श्री देवीस्तवमञ्जरी

श्री लघुसप्तशतीस्तवः । श्री त्रिपुरभैरवीस्तवराजः ।
श्री मातङ्गीरत्नमालास्तवः । श्री आनन्दमयीस्तवराजः ।

ஸ்ரீ தேவீஸ்தவமஞ்சரி

ஸ்ரீ லகுஸப்தசதீஸ்தவः, ஸ்ரீ த்ரிபுரபைரவீஸ்தவராஜः,
ஸ்ரீமாதங்கீரத்னமாலாஸ்தவः, ஸ்ரீஆனந்தமயீஸ்தவராஜः

संपादक :
वाधूल वे. रामचन्द्रशर्मा

ஸ்ரீ பக்த ஸமாஜம்
மேல மாம்பலம் : : சென்னை - 33.

Scanned by CamScanner

श्रीसिद्धनाथ भवतो भुवनैकभर्तु-
भाषा परामृतमयी निगमान्तरस्था ।
एषा त्वनन्यशरणस्य ममाश्रुतस्य
वृत्ता निसर्गकरुणावरुणालयस्य ॥

ओं नमश्चण्डिकायै

यत् कर्म धर्मनिलयं प्रवदन्ति धीराः
यज्ञादिकं तदखिलं सकलं त्वयैव ।
त्वं चेतना यत इति प्रविचार्य चित्तं
नित्ये त्वदीयचरणौ शरणं प्रपद्ये ॥ १ ॥

पाथोधिनाथतनयापतिरेष शेष-
पर्यङ्कलालितवपुः पुरुषः पुराणः ।
त्वन्मोहपाशविवशो जगदम्ब सोऽपि
व्याघूर्णमाननयनः शयनं चकार ॥ २ ॥

त्वत्कौतुकं जननि यस्य जनार्दनस्य
कर्णप्रसूतमलजौ मधुकैटभाख्यौ ।
तस्यापि यौ न भवतः सुलभौ निहन्तुं
त्वन्मायया विकलितौ विलयं गतौ तौ ॥ ३ ॥

Scanned by CamScanner

यन्माहिषं वपुरपूर्वबलोपपन्नं
यन्नाकनायकपराक्रमजित्वरं च ।
यल्लोकशोकजननव्रतबद्धहार्दं
तल्लीलयैव दलितं गिरिजे भवत्या ॥ ४ ॥

यो धूम्रलोचन इति प्रथितः पृथिव्यां
भस्मी बभूव चरणे तव हुङ्कृतेन ।
सर्वासुरक्षयकृते गिरिराजकन्ये
मन्ये स्वमन्युदहने कुत एष होमः ॥ ५ ॥

केषामपि त्रिदशनायकपूर्वकाणां
जेतुं न जातु सुलभावपि चण्डमुण्डौ ।
तौ दुर्मदौ सपदि शम्बरतुल्यमूर्ती
मातस्त्वमेव कुलिशात् पतितौ विशीर्षौ ॥ ६ ॥

दौत्येन ते शिव इति प्रथितप्रभावो
देवोऽपि दानवपतेः सदनं जगाम ।
भूयोऽपि तस्य चरितं प्रथयां चकार
सा त्वं प्रसीद शिवदूति विजृम्भितं ते ॥ ७ ॥

चित्रं यदेतदमरैरपि येन जेयाः
शस्त्राभिघातपतिताद् रुधिरादपर्णे ।
भूमौ बभूवुरमिताः प्रतिरक्तबीजा-
स्तेऽपि त्वयैव गिलिता गगने समस्ताः ॥ ८ ॥

Scanned by CamScanner

आश्चर्यमेतदखिलं यदमू सुरारी
त्रैलोक्यवेभवविलुण्ठनपुष्टपाणी ।
शस्त्रैर्निहत्य भुवि सुम्भनिसुम्भसंज्ञौ
नीतौ त्वया जननि तावपि नाकलोकम् ॥ ९ ॥

त्वत्तेजसि प्रलयकालहुताशनेऽस्मिन्
यस्मिन् प्रयान्ति विलयं भुवनानि सद्यः ।
तस्मिन् निपत्य शलभा इव दानवेन्द्राः
भस्मी भवन्ति हि भवानि किमत्र चित्रम् ॥ १० ॥

तत् किं गृणामि भवतीं भवतीव्रताप-
निर्वापणप्रणयिनीं प्रणमज्जनेषु ।
तत् किं गृणामि भवतीं भवतीव्रताप-
संवर्धनप्रणयिनीं विमतस्थितेषु ॥ ११ ॥

वामे करे तदितरे च यथोपरिष्टात्
पात्रं सुधारसभृतं वरमातुलुङ्गम् ।
खेटं गदां च दधतीं भवतीं भवानि
ध्यायन्ति तेऽरुणनिभां कृतिनस्त एव ॥ १२ ॥

यद् वारुणात् परमिदं जगदम्ब यस्ते
बीजं स्मरेदनुदिनं दहनाधिरूढम् ।
मायाङ्कितं तिलकितं तरुणेन्दुबिन्दु-
नादैरमन्दमिह राज्यमसौ भुनक्ति ॥ १३ ॥

Scanned by CamScanner

अन्तस्थिताप्यखिलजन्तुषु तन्तुरूपा
विद्योतसे बहिरिहाखिलविश्वरूपा ।
का भूरि शब्दरचना वचनातिगासि
दीनं जनं जननि मामव निष्प्रपञ्चम् ॥ १४ ॥
आवाहनं यजनतर्पणमग्निहोत्रं
कर्मार्पणं त्वयि विजर्जनमत्र देवि ।
मोहान्मया कृतमिदं सकलापराधं
मातः क्षमस्व वरदे बहिरन्तरस्थे ॥ १५ ॥
एतत् पठेदनुदिनं दनुजान्तकारि
चण्डीचरित्रमतुलं भुवि यत् त्रिकालम् ।
श्रीमान् सुखी स विजयी सुभगः क्षमः स्यात्
त्यागी चिरंतनवपुः कविचक्रवर्ती ॥ १६ ॥
श्रीसिद्धनाथापरनामधेयः
श्रीशंभुनाथो भुवनैकनाथः ।
तस्य प्रसादात् सकलागमाच्च
पृथ्वीधरः स्तोत्रमिदं चकार ॥ १७ ॥
देव्याः स्तवं ज्ञानमयं कृतं यत्
पृथ्वी धराचार्यवरेण सम्यक् ।
यच्चोद्धृतं सप्तशतीस्थसारं
सर्वान्वितं तन्निगमस्य सारम् ॥ १८ ॥

इति श्री पृथ्वीधराचार्यविरचितो लघुसप्तशतीस्तवः संपूर्णः

Scanned by CamScanner

श्री त्रिपुरभैरवीस्तवराजः

ब्रह्मादयः स्तुतिपदैरपि सूक्ष्मरूपां
जानन्ति नैव जगदादिमनादिमूर्तिम् ।
तस्माद् वयं कुचनतां नवकुङ्कुमाभां
स्थूलां स्तुमः सकलवाङ्मयमातृभूताम् ॥ १ ॥

सद्यः समुद्यतसहस्रदिवाकराभां
विद्याक्षसूत्रवरदाभयचिह्नहस्ताम् ।
नेत्रोत्पलैस्त्रिभिरलंकृतपद्मवक्त्रां
त्वां तारहाररुचिरां त्रिपुरे भजामः ॥ २ ॥

सिन्दूरपुञ्जरुचिरं कुचभारनम्रं
जन्मान्तरेषु कृतपुण्यफलैकगम्यम् ।
अन्योन्यभेदकलहाकुलमानभेदै-
र्जानन्ति किं जडधियस्तव रूपमम्ब ॥ ३ ॥

Scanned by CamScanner

स्थूलां वदन्ति मुनयः श्रुतयो गृणन्ति
सूक्ष्मां वदन्ति वचसामधिवासमन्ये ।
त्वां मूलमाहुरपरे जगतां भवानि
मन्यामहे वयमपारकृपाम्बुराशिम् ॥ ४ ॥

चन्द्रावतंसकलितां शरदिन्दुशुभ्रां
पञ्चाशदक्षरमयीं हृदि भावयन्ति ।
त्वां पुस्तकं जपवटीममृताढ्यकुम्भं
व्याख्यां च हस्तकमलैर्दधतीं त्रिनेत्राम् ॥ ५ ॥

शंभुस्त्वमद्रितनयाकलितार्धभागो
विष्णुस्त्वमम्ब कमलापरिबद्धदेहः ।
पद्मोद्भवस्त्वमसि वागधिवासभूमि-
स्तेषां क्रियाश्च जगति त्रिपुरे त्वमेव ॥ ६ ॥

आश्रित्य वाग्भवभवांश्चतुरः परादीन्
भावान् पदेषु विहितार्थमुदीरयन्तीम् ।
कण्ठादिभिश्च करणैः परदेवतां त्वां
सविन्मयीं हृदि कदापि न विस्मरामि ॥ ७ ॥

आकुञ्च्य वायुमवजित्य च वैरिषट्क-
मालोक्य निश्चलधिया निजनासिकायाम् ।
ध्यायन्ति मूर्ध्नि कलितेन्दुकलावतंसं
त्वद्रूपमम्ब कृतिनस्तरुणार्कबिम्बम् ॥ ८ ॥

Scanned by CamScanner

त्वां प्राप्य मन्मथरिपोर्वपुरर्धभागं
सृष्टिं करोषि जगतामिति वेदवादः ।
सत्यं तदद्रितनये जगदेकमातः
नोचेदशेषजगतः स्थितिरेव न स्यात् ॥ ९ ॥

पूजां विधाय कुसुमैः सुरपादपानां
पीठे तवाम्ब कनकाचलगह्वरेषु ।
गायन्ति सिद्धवनिताः सह किंनरीभिः-
रास्वादितासवरसारुणनेत्रपद्माः ॥ १० ॥

विद्युद्विलासवपुषः श्रियमावहन्तीं
यान्तीं स्ववासभनाच्छिवराजनीम् ।
सौषुम्नमार्गकमलानि विकासयन्तीं
देवीं भजे हृदि परामृतसिक्तगात्रीम् ॥ ११ ॥

आनन्दजन्मभवनं भवनं श्रुतीनां
चैतन्यमात्रतनुमम्ब समाश्रयामि ।
ब्रह्मेशविष्णुभिरभिष्टुतपादपद्मां
सौभाग्यजन्मवसतिं त्रिपुरे यथावत् ॥ १२ ॥

शब्दार्थभावि भुवनं सृजतीन्दुरूपा
या तद् बिभर्ति पुनरर्कतनुः स्वशक्त्या ।
वह्न्यात्मिका हरति तत् सकलं युगान्ते
तां शारदां मनसि जातु न विस्मरामि ॥ १३ ॥

Scanned by CamScanner

नारायणीति नरकार्णवतारिणीति
गौरीति रवेदशमनीति सरस्वतीति ।
ज्ञानप्रदेति नयनत्रयभूषितेति
त्वामद्विराजतनये विबुधा वदन्ति ॥ १४ ॥

ये स्तुवन्ति जगन्मातः श्लोकैर्द्वादशभिः क्रमात् ।[1]
त्वामनुप्राप्य वाक्सिद्धिं प्राप्नुयुस्ते परां गतिम् ॥

इति श्रीत्रिपुरभैरवीस्तवराजः संपूर्णः

---

1. द्वादशभिरिति । 'सद्यः' इत्यादिभिः 'विस्मरामि' इत्यन्तैरित्यर्थः। आद्यपद्यद्वयस्य मुखफन्धरूपत्वात् शेषयोरपि स्वरूपफलनिर्देशात् । अथ च द्वादशभिरिति पदेन कोशभेदात् द्युमणिमालानामकः प्रबन्ध उक्तः । तल्लक्षणं तु—

अथ द्युमणिमालास्यात् पद्यैर्द्वादशभिः सभैः ।
प्रत्येकं नायकोत्कर्ष प्रकाशनपरायणैः ॥
मुखबन्धे श्लोकयुग्मं तथा शेषे द्वयं मतम् ।
कृता द्युमणिमालेयं कीर्ति वृद्धिकरी नृणाम् ॥

इति भामहेनोक्तम् ॥

श्रीः

श्री मातङ्गीरत्नमालास्तवः

देवतां जगतामाद्यां मातङ्गीमिष्टदायिनीम् ।
अवाप्तुमिष्टतां वाचं भूषयेद् रत्नमालया ॥

आराध्य मातुश्चरणाम्बुजं ते
ब्रह्मादयो विश्रुतकीर्तिभाजः ।
अन्ये परं वाग्विभवं मुनीन्द्राः
परां श्रियं भक्तिपरेण चान्ये ॥ १ ॥

नमामि देवीं नवचन्द्रमौले-
र्मातङ्गिनीं चन्द्रकलावंसाम् ।
आम्नाय वाग्भिः प्रतिपादितार्थं
प्रबोधयन्तीं शुकमादरेण ॥ २ ॥

---

1. रत्नमालेति प्रबन्धनाम । तद्योगात् स्तुत नाम पे, तल्लक्षण तु-

नेतृप्रसिद्धनामाङ्कं श्लोकयुग्मं शुभावहम् ।
कुर्यादाद्यन्तयोस्तस्य शिखाबन्धं समाधिना ॥
सुभक्तिः शोभना सा स्यात् रत्नमाला नवाधिका ।
मालायां नवरत्नादौ रचितायामिति क्रमात् ।
भवन्त्येकादशा श्लोकाः पण्डितप्रमुदाकराः ॥

इति नामहेनोक्तम् ।

विनम्रदेवासुरमौलिरत्नै-
नीराजितं ते चरणारविन्दम् ।
भजन्ति ये देवि महीपतीनां
व्रजन्ति ते संपदमादरेण ॥ ३ ॥

मातङ्गलीलागमने भवत्याः
शिञ्जानमञ्जीर मिषाद् भजन्ते ।
मातस्त्वदीयं चरणारविन्द-
मकृत्रिमाणां वचसां निगुम्भाः ॥ ४ ॥

पदात्पदं शिञ्जितनूपुराभ्यां
कृतार्थयन्ती पदवीं पदाभ्याम् ।
आस्फालयन्ती कलवल्लकीं तां
मातङ्गिनीं मद्धृदयं धिनोतु ॥ ५ ॥

नीलांशुकाबद्धनितम्बबिम्बां
तालीदलेनार्पितकर्णभूषाम् ।
माध्वीमदाघूर्णितनेत्रपद्मां
घनस्तनीं शंभुवधूं स्मरामि ॥ ६ ॥

तडिल्लताकान्तमनर्घ्यभूषं
चिरेण लक्ष्यं नवरोमराज्या ।
स्मरामि भक्त्या जगतामधीशे
वलित्रयाङ्कं तव मध्यबिम्बम् ॥ ७ ॥

Scanned by CamScanner

नीलोत्पलानां श्रियमाहरन्तीं
कान्त्या कटाक्षैः कमलाकराणाम् ।
कदम्बमालाञ्चितकेशपाशां
मातङ्गकन्यां हृदि भावयामः ॥ ८ ॥

ध्यायेयमारक्तकपोलकान्तं
विम्बाधरन्यस्तललामरम्यम् ।
आलोलनीलालकमायताक्षं
मन्दस्मितं ते वदनं महेशि ॥ ९ ॥

स्तुत्यानया शंकरार्धमपत्नीं
मातङ्गिनीं वागधिदेवतां ताम् ।
स्तुवन्ति ये भक्तियुता मनुष्याः
परां श्रियं नित्यमुपाश्रयन्ति ॥ १० ॥

इति श्रीमातङ्गीरत्नमालास्तवः संपूर्णः

Scanned by CamScanner

श्रीः

श्रीआनन्दमयीस्तवराजः

अथानन्दमयीं साक्षाच्छब्दब्रह्मस्वरूपिणीम् ।
ईडे सकलसंपत्त्यै जगत्कारणमम्बिकाम् ॥

आद्यामशेषजननीमरविन्दयोने-
विष्णोः शिवस्य च वपुः प्रतिपादयन्तीम् ।
सृष्टिस्थितिक्षयकरीं जगतां त्रयाणां
स्तुत्वा गिरं विमलयाम्यहमम्बिके त्वाम् ॥ १ ॥

पृथ्व्या जलेन शिखिना मरुताम्बरेण
होत्रेन्दुना दिनकरेण च मूर्तिभाजः ।
देवस्य मन्मथरिपोरपि शक्तिमत्ता-
हेतुस्त्वमेव खलु पर्वतराजपुत्रि ॥ २ ॥

[1]त्रिस्रोतसः सकललोकसमर्चितायाः
वैशिष्ट्यकारणमवैमि तदेव मातः ।
त्वत्पादपङ्कजपरागविचित्रितासु
शंभोर्जटासु सततं परिवर्तनं यत् ॥ ३ ॥

---

1. त्रिस्रोतसः — गङ्गायाः

Scanned by CamScanner

आनन्दयेत् कुमुदिनीमधिपः कलानां[1]
नान्यामिनः कमलिनीमथ नेतरां वा ।
एकस्य मोदनविधौ परमेक इष्टे
त्वं तु प्रपञ्चमभिनन्दयसि स्वदृष्ट्या ॥ ४ ॥

आद्याप्यशेषजगतां नवयौवनासि
शैलाधिराज तनयाप्यतिकोमलासि ।
त्रय्याः प्रसूरपि तया न समीक्षितासि[2]
ध्येयासि गौरि मनसो न पथि स्थितासि ॥ ५ ॥

आसाद्य जन्म मनुजेषु चिराद् दुरापं
तत्रापि पाटवमवाप्य निजेन्द्रियाणाम् ।
नाभ्यर्चयन्ति जगतां जनयित्रि ये त्वां
निःश्रेणिकाग्रमधिरुह्य पुनः पतन्ति ॥ ६ ॥

कर्पूरचूर्णहिमवारि विलोलितेन
ये चन्दनेन कुसुमैश्च सुजातगन्धैः ।
आराधयन्ति हि भवानि समुत्सुकास्त्वां
ते खल्वशेषभुवनाधि भुवः प्रथन्ते ॥ ७ ॥

---

1. कलानाम् अधिपः, चन्द्रः । इनः, सूर्यः । नान्याम्-कमलिनीम् - नेतराम्-कुमुदिनीम् ।

2. न समीक्षिता- इयत्ता न ज्ञातेति भावः । मनसो न मयिस्थितेति अचिन्त्यरूपेति भावः ।

आविश्य मध्यपदवीं प्रथमे सरोजे
सुप्ताहिराजसदृशीं विरचय्य विश्वम् ।
विद्युल्लतावलयविभ्रममुद्वहन्ती
पद्मानि पञ्च विदलय्य खमश्नुवाना ॥ ८ ॥

तन्निर्गतामृतरसैरभिषिक्तगात्री
मार्गेण तेन निलयं पुनरप्यवाप्ता ।
येषां हृदि स्फुरसि जातु न ते भवेयु-
र्मातर्महेश्वरकुटुम्बिनि गर्भभाजः ॥ ९ ॥

आलम्बिकुन्तलभरामभिरामवक्त्रा-
मापीवरस्तनतटीं तनुवृत्तमध्याम् ।
चिन्ताक्षसूत्रकलशालिखिताढ्यहस्ता-
मावर्तयामि मनसा तव गौरि मूर्तिम् ॥ १० ॥

आस्थाय योगमविजित्य च वैरिषट्क-
मावद्ध्य चेन्द्रियगणं मनसि प्रसन्ने ।
पाशाङ्कुशा भयवराढ्यकरां सुरक्ता
मालोकयन्ति भुवनेश्वरि योगिनस्त्वाम् ॥ ११ ॥

उत्तप्तहाटकनिभा करिभिश्चतुर्भि
रावर्तितामृतघटैरभिषिच्यमाना ।
हस्तद्वयेन रुचिरे नलिने वहन्ती
पद्मापि साभयवरा भवसि त्वमेव ॥ १२ ॥

Scanned by CamScanner

अष्टाभिरुग्रविविधायुधवाहिनीभि-
दोर्वल्लरीभिरधिरुह्य मृगाधिराजम् ।
दूर्वादलद्युतिरमर्त्यविपक्षपक्षान्
न्यक्कुर्वती त्वमसि देवि भवानि दुर्गा ॥ १३ ॥

आविर्निदाघजलशीकरशोभिवक्त्रां
गुञ्जागुणेन परिकल्पितहारयष्टिम् ।
पत्रांशुकामसितकान्तिमनङ्गतन्त्रा-
माद्यां पुलिन्दतरुणीमसकृत् स्मरामि ॥ १४ ॥

हंसैर्गतिक्वणितनूपुरदूरकृष्टै-
र्मूर्तैरिवाद्यवचनैरनुगम्यमानौ ।
पद्माविवोर्ध्वमुखरूढसुजातनालौ
श्रीकण्ठपत्नि शिरसा दधे तवाङ्घ्री ॥ १५ ॥

द्वाभ्यां समीक्षितुमतृप्तिमतेव दृग्भ्या-
मुत्पाद्य भालनयनं वृषकेतनेन ।
सान्द्रानुरागतरलेन निरीक्षमाणे
जङ्घे उभे अपि भवानि तवानतोऽस्मि ॥ १६ ॥

ऊरू स्मरामि जितहस्तिकरावलेपौ
स्थौल्येन पाण्डुरतया परिभूतरम्भौ ।
श्रोणीभरस्य सहनौ परिकल्प्य दत्तौ
स्तम्भाविवाम्ब वयसा तव मध्यमेन ॥ १७ ॥

श्रोण्यौ स्तनौ च युगपत् प्रथयिष्यतोच्चै-
बाल्यात् परेण वयसा परिकृष्टसारः ।
रोमावलीविलसितेन विभाव्य मूर्ति-
र्मध्यस्तव स्फुरतु मे हृदयस्य मध्ये ॥ १८ ॥

सख्युः स्मरस्य हरनेत्रहुताशभीरो-
र्लावण्यवारिभरितं नययौवनेन ।
आपाद्य दत्तमिव पल्वलमप्रधृष्यं
नाभिं कदापि तव देवि न विस्मरेयम् ॥ १९ ॥

ईशोपगूहपिशुनं भसितं दधाने
काश्मीरकर्दममनु स्तनपङ्कजे ते ।
स्नानोत्थितस्य करिणः क्षणलब्धफेनौ
सिन्दूरितौ स्मरयतः समदस्य कुम्भौ ॥ २० ॥

कण्ठातिरिक्तगलदुज्ज्वलान्ति धारा
शोभौ भुजौ निजरिपोर्मकरध्वजेन ।
कण्ठग्रहाय रचितौ किल दीर्घपाशौ
मातर्मम स्मृतिपथं न विलङ्घयेथाः ॥ २१ ॥

नात्यायतं रुचिरकम्बुविलासचौर्यं
भूषाभरेण विविधेन विराजमानम् ।
कण्ठं मनोहरगुणं गिरिराजकन्ये
संचिन्त्य तृप्तिमुपयामि कदापि नाहम् ॥ २२ ॥

Scanned by CamScanner

अत्यायताक्षमभिजातललाटपट्टं
मन्दस्मितेन दरफुल्लकपोलरेखम् ।
बिम्बाधरं वदनमुन्नतदीर्घनासं
यस्ते स्मरत्यसकृदेव स एव जातः ॥ २३ ॥

आविस्तुषारकरलेखमनल्पगन्धं
पुष्पोपरि भ्रमदलिव्रजनिर्विशेषम् ।
यश्चेतसा कलयते तव केशपाशं
तस्य स्वयं गलति देवि पुराणपाशः ॥ २४ ॥

श्रुतिसुचरितपाकं धीमतां स्तोत्रमेतत्
पठति य इह मर्त्यो नित्यमार्द्रान्तरात्मा ।
स भवति पदमुच्चैः संपदां पादनम्र-
क्षितिपमुकुटलक्ष्मीलक्षणानां चिराय ॥ २५ ॥

इत्यानन्दमयी स्तवराजः संपूर्णः

Scanned by CamScanner